# Ishvara Dhyana Manjari Compiled from Prapanchasara

# પ્રપઞ્ચસારતઃ સઙ્કલિતા ઈશ્વરધ્યાનમઞ્જરી

## Document Information

Text title : ishvara Dhyana Manjari Compiled from Prapanchasara by Shankaracharya

File name : IshvaradhyAnamanjarIH.itx

Category : deities_misc, sangraha, dhyAnam, shankarAchArya

Location : doc_deities_misc

Proofread by : Aruna Narayanan

Latest update : August 20, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 22, 2023

*sanskritdocuments.org*

# પ્રપઞ્ચસારતઃ સઙ્કુલિતા ઈશ્વરધ્યાનમઞ્જરી

॥ શ્રીઃ ॥

શ્રી ગુરુભ્યો નમઃ ।
જગદ્ગુરુ શ્રીશઙ્કરભગવત્પાદવિરચિતપ્રપઞ્ચસારતઃ સઙ્કુલિતા
શ્રી ગણપતયે નમઃ ।
ગુરુર્બ્રહ્મા ગુરુર્વિષ્ણુઃ ગુરુર્દેવો મહેશ્વરઃ ।
ગુરુઃ સાક્ષાત્પરં બ્રહ્મ તસ્મૈ શ્રીગુરવે નમઃ ॥

શ્રુતિસ્મૃતિપુરાણાનામાલયં કરુણાલયમ્ ।
નમામિ ભગવત્પાદશઙ્કરં લોકશઙ્કરમ્ ॥

શુક્લામ્બરધરં વિષ્ણું શશિવર્ણં ચતુર્ભુજમ્ ।
પ્રસન્નવદનં ધ્યાયેત્સર્વવિઘ્નોપશાન્તયે ॥

## ૧. શ્રી શારદા

અકચટતપયાદ્યૈઃ સપ્તભિર્વર્ણવર્ગૈઃ
વિરચિતમુખબાહાપાદ હૃત્કુક્ષિમધ્યા ।
સકલજગદધીશા શાશ્વતા વિશ્વયોનિઃ
વિતરતુ પરિશુદ્ધિં ચેતસઃ શારદા વઃ ॥ ૧.૧॥

## ૨. માતૃકા સરસ્વતી

પઞ્ચાશદ્વર્ણભેદૈઃ વિહિતવદનદોઃ પાદયુક્ કુક્ષિવક્ષો-
દેશાં ભાસ્વત્કપર્દાકલિતશશિકલામિન્દુકુન્દાવદાતામ્ ।
અક્ષસ્રક્કુમ્ભચિન્તાલિખિતવરકરાં ત્રીક્ષણાં પદ્મસંસ્થાં
અચ્છાકલ્પામતુચ્છસ્તનજઘનભરાં ભારતીં તાં નમામિ ॥

## ૩. ત્રિપુરા

આતામ્રાર્કાયુતાભાં કલિતશશિકલારઞ્જિતસ્માં ત્રિણેત્રાં
    દેવીં પૂર્ણેન્દુવક્ત્રાં વિધૃતજપપટીપુસ્તકાભીત્યભીષ્ટામ્ ।
પીનોત્તુઙ્ગસ્તનાર્તાં વલિલસિતવલગ્નામસૃક્પઙ્કરાજન્-
    મુણ્ડસ્રઙ્મણ્ડિતાઙ્ગીમરુણતરદુકૂલાનુલેપાં નમામિ ॥

## ૪. વાગીશ્વરી

અમલકમલસંસ્થા લેખિનીપુસ્તકોદ્યત્-
    કરયુગલસરોજા કુન્દમન્દારગૌરા ।
ધૃતશશધરખણ્ડોલ્લાસિકોટીરચૂડા
    ભવતુ ભવભયાનાં ભઙ્ગિની ભારતી વઃ ॥

## ૫. સરસ્વતી

હંસારૂઢા ભસિતહર હારેન્દુકુન્દાવદાતા
    વાણી મન્દસ્મિતયુતમુખી મૌલિબદ્ધેન્દુલેખા ।
વિદ્યા વીણામૃતમયઘટાક્ષસ્રગાદીપ્તહસ્તા
    શુભ્રાબ્જસ્થા ભવદભિમતપ્રાપ્તયે ભારતી સ્યાત્ ॥

## ૬. ભુવનેશ્વરી

ઉદ્યદ્ભાસ્વત્સમાભાં વિજિતનવજપામિન્દુખણ્ડાવનદ્ધ-
    દ્યોતન્મૌલિં ત્રિણેત્રાં વિવિધમણિલસત્કુણ્ડલાં પદ્મગાં ચ ।
હારગ્રૈવેયકાઞ્ચીગુણમણિવલયાદ્યૈર્વિચિત્રામ્બરાઢ્યાં
    અમ્બાં પાશાઙ્કુશેષ્ટાભયકરકમલામમ્બિકાં તાં નમામિ ॥

ભાસ્વદ્રત્નૌઘમૌલિસ્ફુરદમૃતરુચો રઞ્જયચ્ચારુ રેખાં
સમ્યક્સન્તપ્તકાર્તસ્વરકમલજપાભાસુરાભિઃ પ્રભાભિઃ ।
વિશ્વાકાશાવકાશં જ્વલયદશિશિરં ધર્તૃ પાશાઙ્કુશેષ્ટા-
ભીતીનાં ભઙ્ગિતુઙ્ગસ્તનમવતુ જગન્માતુરાર્કં વપુર્વઃ ॥

## ૭. લક્ષ્મીઃ

ભૂયાદ્ભૂયો દ્વિપદ્માભયવરદકરા તપ્તકાર્તસ્વરાભા
શુભ્રાભ્રાભેભયુગ્મદ્વયધૃતકરકુમ્ભાદ્ભિરાસિચ્યમાના ।
રત્નૌઘાબદ્ધમૌલિર્વિમલતરદુકૂલાર્તવાલેપનાઢ્યા
પદ્માક્ષી પદ્મનાભોરસિ કૃતવસતિઃ પદ્મગા શ્રીઃ શ્રિયે વઃ ॥

પદ્મસ્થા પદ્મનેત્રા કમલયુગવરાભીતિયુગ્દોઃસરોજા
દેહોત્થાભિઃ પ્રભાભિસ્ત્રિભુવનમખિલં ભાસુરા ભાસયન્તી ।
મુક્તાહારાભિરામોન્નતકુચકલશા રત્નમઞ્જીરકાઞ્ચી-
ગ્રૈવેયોર્મ્યઙ્ગદાઢ્યા ધૃતમણિમકુટા શ્રેયસે શ્રીર્ભવેદ્વઃ ॥

હસ્તોદ્યદ્વસુપાત્રપઙ્કજયુગાદર્શા સ્ફુરન્નૂપુર-
ગ્રૈવેયાઙ્ગદહારકઙ્કણમહામૌલિજ્વલત્કુણ્ડલા ।
પદ્મસ્થા પરિચારિકાપરિવૃતા શુક્લાઙ્ગરાગાંશુકા
દેવી દિવ્યગણાનતા ભવદઘપ્રધ્વંસિની સ્યાદ્રમા ॥

અરુણકમલસંસ્થા તદ્રજઃપુઞ્જવર્ણા
કરકમલધૃતેષ્ટાભીતિ યુગ્મામ્બુજા ચ ।
મણિમકુટવિચિત્રાલઙ્કૃતકલ્પજાતૈઃ
ભવતુ ભુવનમાતા સન્તતં શ્રીઃ શ્રિયે વઃ ॥

## ૮. ત્રિપુટાદેવી

આબદ્ધરત્નમકુટાં મણિકુણ્ડલોદ્યત્-
કેયૂરકોર્મિરશનાહ્વયનૂપુરાઢ્યામ્ ।
ધ્યાયે ધૃતાબ્જયુગપાશકશાઙ્કુશેક્ષુ-
ચાપાં સપુષ્પવિશિખાં નવહેમવર્ણામ્ ॥

## ૯. ભૂદેવી

મુખ્યામ્ભોજે નિવિષ્ટારુણચરણતલા શ્યામલાઙ્ગી મનોજ્ઞા
ચઞ્ચચ્છાલ્યગ્રચુમ્બચ્છુકલસિતકરા પ્રાપ્તનીલોત્પલા ચ ।
રત્નાકલ્પાભિરામા મણિમયમકુટા ચિત્રવસ્ત્રા પ્રસન્ના

દિશ્યાદ્વિશ્વમ્ભરા નઃ સતતમભિમતં વલ્લભા કૈટભારેઃ ॥

## ૧૦. ત્વરિતા

શ્યામતનુમરુણપઙ્કજચરણતલાં વૃષલનાગમઞ્જીરામ્ ।
સ્વર્ણાંશુકપરિધાનાં વૈશ્યાહિદ્વન્દ્વમેખલાકલિતામ્ ॥

તનુમધ્યલતાં પૃથુલસ્તનયુગલાં કરવિરાજદભયવરામ્ ।
શિખિપિઞ્છનાલવલયાં ગુઞ્જાફલગુણિતભૂષણારુણિતામ્ ॥

નૃપફણિકેયૂરાં તાં ગલવિલસદ્વિવિધમણિયુતાભરણામ્ ।
દ્વિજનાગવિહિતકુણ્ડલમણ્ડિતગણ્ડદ્વયી મુકુરશોભામ્ ॥

શોણતરાધરપલ્લવવિદ્રુમમણિભાસુરાં પ્રસન્નાં ચ ।
પૂર્ણશશિબિમ્બવદનામરુણાયતલોચનત્રયીનલિનામ્ ।
કુઞ્ચિતકુન્તલવિલસન્મકુટાઘટિતાહિ વૈરિપિઞ્છયુતામ્ ॥

કૈરાતીં વનકુસુમોજ્જ્વલાં મયૂરાતપત્રકેતનિકામ્ ।
સુરુચિરસિંહાસનગાં વિભ્રમસમુદાયમન્દિરાં તરુણીમ્ ॥ (ધ્યાયે)

## ૧૧. વજ્રપ્રસ્તારિણી

ઇન્દુકલાકલિતોજ્જ્વલમૌલિઃ
    મારમદાકુલિતા યુગનેત્રા ।
શોણિતસિન્ધુતરઙ્ગિતપોત-
    દ્યોતિતભાનુદલામ્બુજસંસ્થા ॥

દોર્ધૃતદાડિમસાયકપાશા
    સાઙ્કુશચાપકપાલસમેતા ।
શોણદુકૂલવિલેપનમાલ્યા
    શોણતરા ભવતોઽવતુ દેવી ॥

## ૧૨. નિત્યક્લિન્ના

રક્તા રક્તાંશુકકુસુમવિલેપાદિકા સેન્દુમૌલિઃ
    સ્વિદ્યદ્વક્ત્રા મદવિવશસમાઘૂર્ણિતત્રીક્ષણા ચ ।

દોસ્સત્પાશાઙ્કુશયુતકપાલાભયા પદ્મસંસ્થા
    દેવી પાયાદમિતફલદા નિત્યશઃ પાર્વતી વઃ ॥

## ૧૩. દુર્ગા

શઙ્ખારિચાપશરભિન્નકરાં ત્રિણેત્રાં
    તિગ્મેતરાંશુકલયા વિલસત્કિરીટામ્ ।
સિંહસ્થિતાં સસુરસિદ્ધનુતાં ચ દુર્ગાં
    દૂર્વાનિભાં દુરિતગર્વહરાં નમામિ ॥

હેમપ્રખ્યામિન્દુખણ્ડાત્તમૌલિં
    શઙ્ખારિષ્ટાભીતિ હસ્તાં ત્રિણેત્રામ્ ।
હેમાબ્જસ્થાં પીતવસ્ત્રાં પ્રસન્નાં
    દેવીં દુર્ગાં દિવ્યરૂપાં નમામિ ॥

અરિશઙ્ખ કૃપાણખેટબાણાન્
    સધનુઃશૂલકતર્જનીર્દધાના ।
ભવતાં મહિષોત્તમાઙ્ગસંસ્થા
    નવદૂર્વાસદૃશી શ્રિયેઽસ્તુ દુર્ગા ॥

## ૧૪. શૂલિનીદુર્ગા

બિભ્રાણા શૂલબાણાસ્યરિસદરગદાચાપપાશાન્ કરાબ્જૈઃ
    મેઘશ્યામા કિરીટોલ્લિખિતજલધરા ભીષણા ભૂષણાઢ્યા ।
સિંહસ્કન્ધાધિરૂઢા ચતસૃભિરસિખેટાન્વિતાભિઃ પરીતા
    કન્યાભિર્ભિન્નદૈત્યા ભવતુ ભવભયધ્વંસિની શૂલિની વઃ ॥

## ૧૫. જાતવેદો દુર્ગા

ભાસ્વદ્વિદ્યુત્કરાલાકુલહરિગલસંસ્થારિશઙ્ખાસિખેટે-
ષ્વસ્ત્રાસાખ્યત્રિશૂલાનરિગણભયદાં તર્જનીં ચાદધાના ।
ચર્માસ્યુદ્ઘૂર્ણદોર્ભિઃ પ્રહરણનિપુણાભિર્વૃતા કન્યકાભિઃ
દદ્યાત્કાર્શાનવીષ્ટાન્ ત્રિણયનલસિતા કાપિ કાત્યાયની વઃ ।
કરકમલવિરાજચ્ચક્રશઙ્ખાસિશૂલા

પરિલસિતકિરીટા પાતિતાનેકવિઘ્ના ।
ત્રિણયન લસિતાઙ્ગી તિગ્મરશ્મિપ્રકાશા-
પવનસખનિભાઙ્ગી પાતુ કાત્યાયની વઃ ॥

## ૧૬. અજપામૂર્તિઃ

અરુણકનકવર્ણં પદ્મસંસ્થં ચ ગૌરી-
હરનિયમિતચિહ્નં સૌમ્યતાનૂનપાતમ્ ।
ભવતુ ભવદભીષ્ટપ્રાપ્તયે પાશટઙ્કા-
ભયવરદવિચિત્રં રૂપમર્ધામ્બિકેશમ્ ॥

## ૧૭. અગ્નિઃ

અગ્નિં પ્રજ્વલિતં વન્દે જાતવેદં હુતાશનમ્ ।
સુવર્ણવર્ણમમલં સમિદ્ધં વિશ્વતોમુખમ્ ॥

ત્રિણયનમરુણાબદ્ધમૌલિં સુશુક્લાં-
શુકમરુણમનેકાકલ્પમમ્ભોજસંસ્થમ્ ।
અભિમતવરશક્તિસ્વસ્તિકાભીતિ હસ્તં
નમત કનકમાલાલઙ્કૃતાંસં કૃશાનુમ્ ॥

શક્તિ સ્વસ્તિક પાશાન્ સાઙ્કુશવરદાભયાન્ દધત્ ત્રિમુખઃ ।
મકુટાદિવિવિધભૂષોઽવતાચ્ચિરં પાવકઃ પ્રસન્નો નઃ ॥

હૈમાશ્વત્થસુરદ્રુમોદરભુવો નિર્યાન્તમશ્વાકૃતિં
વર્ષન્તં ધનધાન્યરત્નનિચયાન્ રન્ધ્રૈઃ સ્વકૈઃ સન્તતમ્ ।
જ્વાલાપલ્લવિત સ્વરોમવિવરં ભક્તાર્તિસંભેદનં
વન્દે ધર્મસુખાર્થમોક્ષફલદં દિવ્યાકૃતિં પાવકમ્ ॥

## ૧૮. સૂર્યઃ

અરુણસરોરુહસંસ્થઃ ત્રિદૃગરુણોઽરુણસરોજયુગલધરઃ ।
કલિતાભયવરદો દ્યુતિબિમ્બોઽમિતભૂષણસ્ત્વિનોઽવતુ નઃ ॥

અરુણોઽરુણપઙ્કજે નિષણ્ણઃ કમલેઽભીતિવરૌ કરૈર્દધાનઃ ।

સ્વરુચાહિતમણ્ડલત્રિણેત્રો રવિરાકલ્પશતાકુલોઽવતાદ્વઃ ॥

## ૧૯. ચન્દ્રઃ

અમલકમલસંસ્થઃ સુપ્રસન્નાનનેન્દુઃ
    વરદકુમુદહસ્તશ્ચારુહારાદિભૂષઃ ।
સ્ફટિકરજતવર્ણો વાઞ્છિતપ્રાપ્તયે વો
    ભવતુ ભવદભીષ્ટોદ્યોતિતાઙ્કઃ શશાઙ્કઃ ॥

## ૨૦. મહાગણપતિઃ

મન્દારાદ્યૈઃ કલ્પકવૃક્ષવિશેષૈર્વિશિષ્ટતરફલદૈઃ ।
શિશિરતરચતુરાશેઽન્તર્બાલાતપચન્દ્રિકાકુલે ચ તલે ॥

ઐક્ષવજલનિધિલહરીકણજાલકવાહિના ચ ગન્ધવહેન ।
સંસેવિતે ચ સુરતરુ સુમનઃશ્રિતમધુપપક્ષચલનપરેણ ॥

રત્નમયે મણિવજપ્રવાલફલપુષ્પપલ્લવસ્ય સતઃ ।
મહતોઽધસ્તાદૃતુભિઃ યુગપત્ સંસેવિતસ્ય કલ્પતરોઃ ॥

સિંહમુખપાદપીઠગલિપિમયપદ્મે ત્રિષટ્કોણોલ્લસિતે ।
આસીનસ્ત્વેકરદો બૃહદુદરો દશભુજોઽરુણતનુશ્ચ ગજવદનઃ ॥

બીજાપૂરગદેક્ષુકાર્મુકરુજાચક્રબ્જપાશોત્પલ-
    વ્રીહ્યગ્રસ્વવિષાણરત્નકલશપ્રોદ્યત્કરામ્ભોરુહઃ ।
ધ્યેયો વલ્લભયા સપદ્મકરયા શ્લિષ્ટો જ્વલદ્ભૂષયા
    વિશ્વોત્પત્તિવિપત્તિસંસ્થિતિકરો વિઘ્નો વિશિષ્ટાર્થદઃ ॥

કરપુષ્કરધૃતકલશસ્રુતમણિમુક્તાપ્રવાલવર્ષેણ ।
    અવિરતધારાં વિકિરન્ પરિતઃ સાધકસમગ્રસમ્પત્ત્યૈ ।
મદજલલોલુપમધુકરમાલાં નિજકર્ણતાલતાડનયા ।
    નિર્વાસયન્મુહુર્મુહુઃ અમરૈરસુરૈશ્ચ સેવિતો યુગપત્ ॥

રક્તો રક્તાઙ્ગ રાગાંશુકકુસુમયુતસ્તુન્દિલશ્ચન્દ્રમૌલિઃ
    નેત્રૈર્યુક્તસ્ત્રિભિર્વામનકરચરણો બીજપૂરાત્તનાસઃ ।
હસ્તાગ્રાક્લૃપ્તપાશાઙ્કુશરદવરદો નાગવક્ત્રોઽહિભૂષો

દેવઃ પદ્માસનો નો ભવતુ નતસુરો ભૂતયે વિઘ્નરાજઃ ॥

## ૨૧. ક્ષિપ્રપ્રસાદનગણપતિઃ

ધૃતપાશાઙ્કુશકલ્પકલતિકાસ્વરદશ્ચ બીજપૂરયુતઃ ।
શશિશકલકલિતમૌલિઃ ત્રિલોચનોઽરુણશ્ચ ગજવદનઃ ॥

ભાસુરભૂષણદીપ્તો બૃહદુદરઃ પદ્મવિષ્ટરો લલિતઃ ।
ધ્યેયોઽનાયતદોઃપદસરસિરુહઃ સમ્પદે સદા મનુજૈઃ ॥

## ૨૨. કામદેવઃ

અરુણમરુણવાસોમાલ્યદામાઙ્ગરાગં
 સ્વકરકલિતપાશં સાઙ્કુશાસ્ત્રેષુચાપમ્ ।
મણિમયમકુટાદ્યૈર્દીપ્તમાકલ્પજાતૈઃ
 અરુણનલિનસંસ્થં ચિન્તયેદઙ્ગયોનિમ્ ॥

## ૨૩. શ્રીકૃષ્ણઃ

અવ્યાન્મીલત્કલાયદ્યુતિરહિરિપુપિઞ્છોલ્લસત્કેશજાલો
 ગોપીનેત્રોત્પલારાધિત લલિતવપુર્ગોપગોવૃન્દવીતઃ ।
શ્રીમદ્વક્ત્રારવિન્દ પ્રતિહસિતશશાઙ્કાકૃતિઃ પીતવાસાઃ
 દેવોઽસૌ વેણુવાદ્યક્ષપિતજનધૃતિર્દેવકીનન્દનો વઃ ॥

## ૨૪. શ્રી વિષ્ણુઃ

વિષ્ણું ભાસ્વત્કિરીટાઙ્ગદવલયગલાકલ્પહારોદરાઙ્ઘ્રિ-
 શ્રોણીભૂષં સવક્ષોમણિમકરમહાકુણ્ડલામણ્ડિતાઙ્ગમ્ ।
હસ્તોદ્યચ્ચક્રશઙ્ખામ્બુજગદમમલં પીતકૌશેયમાશા-
 વિદ્યોતદ્ભાસમુદ્યદ્દિનકરસદૃશં પદ્મસંસ્થં નમામિ ॥

અર્કૌઘાભં કિરીટાન્વિતમકરલસત્કુણ્ડલં દીપ્તિરાજત્-
 કેયૂરં કૌસ્તુભાભાશબલરુચિરહારં સપીતામ્બરં ચ ।
નાનારત્નાંશુભિન્નાભરણશતયુજં શ્રીધરાશ્લિષ્ટપાર્શ્વં

વન્દે દોઃસક્ત ચક્રામ્બુરુહદરગદં વિશ્વવન્દ્યં મુકુન્દમ્ ॥

હરિમુજ્જ્વલ ચક્રદરાબ્જગદા-
કુલદોઃપરિઘં સિતપદ્મગતમ્ ।
વલયાઙ્ગદહારકિરીટધરં
નવકુન્દરુચિં પ્રણમામિ સદા ॥

## ૨૫. શ્રી સુદર્શન નારાયણઃ

અવ્યાદ્ભાસ્કર સપ્રભાભિરખિલાભાભિર્દિશો ભાસયન્
ભીમાક્ષઃ ક્ષરદટ્ટહાસ વિકસદ્ દંષ્ટ્રાગ્રદીપ્તાનનઃ ।
દોર્ભિશ્ચક્રદરૌ ગદાબ્જમુસલાસ્ત્રાસીંશ્ચ પાશાઙ્કુશૌ
બિભ્રત્પિઙ્ગ શિરોરુહોઽથ ભવન્તશ્ચક્રાભિધાનો હરિઃ ॥

## ૨૬. શ્રીકરઃ વિષ્ણુઃ

દુગ્ધાબ્ધિદ્વીપવર્યપ્રવિલસિતસુરોદ્યાનકલ્પદ્રુમાધો
ભદ્રામ્ભોજન્મપીઠોપરિગતવિનતાનન્દનસ્કન્ધસંસ્થઃ ।
દોર્ભિર્બિભ્રદ્રથાઙ્ગં સદરમથ ગદાપઙ્કજે સ્વર્ણવર્ણો
ભાસ્વન્મૌલિર્વિચિત્રાભરણપરિગતઃ સ્યાચ્છ્રિયે વો મુકુન્દઃ ॥

## ૨૭. વરાહઃ

જાન્વોરાપાદમુદ્યત્કનકમિવ હિમપ્રખ્યમાજાનુ નાભેઃ
કણ્ઠાદાનાભિ વહ્નિપ્રભમથ શિરસશ્ચાગલં નીલવર્ણમ્ ।
મૌલેર્વ્યોમાભમાઙ્કું કરલસદરિશઙ્ખાસિખેટં ગદાશ-
ક્ત્યાખ્યેષ્ટાભીતિયુક્તં પ્રણમત વસુધોલ્લાસિદંષ્ટ્રં વરાહમ્ ॥

## ૨૮. નૃસિંહઃ

જાન્વોરાસક્તતીક્ષ્ણસ્વનખ રુચિલસદ્બાહુસંસ્પૃષ્ટકેશઃ
ચક્રં શઙ્ખં ચ દોર્ભ્યાં દધદનલસમજ્યોતિષા ભગ્નદૈત્યઃ ।
જ્વાલામાલાપરીતં રવિશશિદહનત્રીક્ષણં દીપ્તજિહ્વં

દંષ્ટ્રોગ્રં ધૂતકેશં વદનમપિ વહન્ પાતુ વો નારસિંહઃ ॥

ઉદ્યદ્ભાસ્વત્સહસ્રપ્રભમશનિનિભત્રીક્ષણૈર્વિક્ષરન્તં
વહ્નીનહ્નાય વિદ્યુત્તતિવિતતસટાભીષણં ભૂષણૈશ્ચ ।
દિવ્યૈરાદીપ્તદેહં નિશિતનખલસદ્બાહુદણ્ડૈરનેકૈઃ
સંભિન્નં ભિન્નદૈત્યેશ્વરતનુમતનું નારસિંહં નમામિ ॥

અવ્યાન્નિર્વ્યાજરૌદ્રાકૃતિરભિવિવૃતાસ્યોલ્લસત્તીક્ષ્ણદંષ્ટ્રઃ
ચક્રં શઙ્ખં ચ પાશાઙ્કુશકુલિશગદાદારણાખ્યાન્દધાનઃ ।
રક્તાકારશ્ચ નાભેરધ ઉપરિ સિતો દિવ્યભૂષાવિશેષઃ
દેવોઽર્કાગ્નીન્દુનેત્રો નિખિલસુખકરો નારસિંહશ્ચિરં વઃ ॥

## ૨૯. વિશ્વરૂપો વિષ્ણુઃ

અગ્નીષોમાત્મકમરિગદાશાર્ઙ્ગખડ્ગૈઃ સશઙ્ખૈઃ
ઉદ્યદ્બાહું હલમુસલશૂલૈઃ સકુન્તૈઃ સદણ્ડૈઃ ।
શક્ત્યા પાશાઙ્કુશકુલિશટઙ્કાગ્નિભિશ્ચાર્કવહ્નિ-
દ્યોતદ્વક્ત્રાઙ્ઘ્રિકસરસિજં તપ્તકાર્તસ્વરાભમ્ ॥

વિષ્ણું ભાસ્વત્કિરીટં મણિમકુટકટીસૂત્રકેયૂરહાર-
ગ્રૈવેયોર્મ્યાદિમુખ્યાભરણમણિગણોલ્લાસિદિવ્યાઙ્ગરાગમ્ ।
વિશ્વાકાશાવકાશપ્રવિતતમયુતાદિત્યનીકાશમુદ્યદ્-
બાહ્વગ્રવ્યગ્રનાનાયુધનિકરકરં વિશ્વરૂપં નમામિ ॥

## ૩૦. વિષ્ણુપઞ્જરદેવતા

નમો ભગવતે સર્વવિષ્ણવે વિશ્વરૂપિણે ।
વાસુદેવાય ચક્રાદિસર્વાયુધભૃતે નમઃ ॥

## ૩૧. શિવઃ

શૂલાહીટઙ્ક ઘણ્ટાસિસૃણિકુલિશપાશાગ્ન્યભીતીર્દધાનં
દોર્ભિઃ શીતાંશુખણ્ડપ્રતિઘટિતજટાભારમૌલિં ત્રિણેત્રમ્ ।
નાનાકલ્પાભિરામાપઘનમભિમતાર્થપ્રદં સુપ્રસન્નં
પદ્મસ્થં પઞ્ચવક્ત્રં સ્ફટિકમણિનિભં પાર્વતીશં નમામિ ॥

બિભ્રદ્દોર્ભિઃ કુઠારં મૃગમભયવરૌ સુપ્રસન્નો મહેશઃ
    સર્વાલઙ્કારદીપ્તઃ સરસિજનિલયો વ્યાઘ્રચર્માત્તવાસાઃ ।
ધ્યેયો મુક્તાપરાગામૃતરસકલિતાદ્રિપ્રભઃ પઞ્ચવક્ત્રઃ
    ત્ર્યક્ષઃ કોટીરકોટીઘટિતતુહિનરોચિષ્કલોત્તુઙ્ગમૌલિઃ ॥

નમોઽસ્તુ સ્થાણુભૂતાય જ્યોતિર્લિઙ્ગાવૃતાત્મને ।
ચતુર્મૂર્તિવપુશ્છાયાભાસિતાઙ્ગાય શમ્ભવે ॥

વન્દે હરં વરદશૂલકપાલહસ્તં
    સાભીતિમદ્રિસુતયોજ્જ્વલદેહકાન્તિમ્ ।
વામોરુપીઠગતયા નિજવામહસ્ત-
    ન્યસ્તારુણોત્પલરુચા પરિરબ્ધદેહમ્ ॥

વામાઙ્કન્યસ્તવામેતરકરકમલાયાસ્તથા વામબાહુ-
    ન્યસ્તારક્તોત્પલાયાઃ સ્તનવિધૃતિલસદ્વામબાહુઃ પ્રિયાયાઃ ।
સર્વાકલ્પાભિરામો ધૃતપરશુમૃગેષ્ટઃ કરૈઃ કાઞ્ચનાભઃ
    ધ્યેયઃ પદ્માસનસ્થઃ સ્મરલલિતતનુઃ સમ્પદે પાર્વતીશઃ ॥

## ૩૨. દક્ષિણામૂર્તિઃ

મુદ્રાં ભદ્રાર્થદાત્રીં સપરશુહરિણાં બાહુભિર્બાહુમેકં
    જાન્વાસક્તં દધાનો ભુજગવરસમાબદ્ધકક્ષ્યો વટાધઃ ।
આસીનશ્ચન્દ્રખણ્ડપ્રતિઘટિતજટઃ ક્ષીરગૌરસ્ત્રિણેત્રઃ
    દદ્યાદાદ્યૈઃ શુકાદ્યૈર્મુનિભિરભિનુતો ભાવશુદ્ધિં ભવો વઃ ॥

દક્ષિણામૂર્તયે તુભ્યં વટમૂલનિવાસિને ।
ધ્યાનૈકનિરતાઙ્ગાય નમો રુદ્રાય શમ્ભવે ॥

## ૩૩. અઘોરરુદ્રઃ

કાલાભ્રાભઃ કરાગ્રૈઃ પરશુડમરુકૌ ખડ્ગખેટૌ ચ બાણે-
    ષ્વાસૌ શૂલં કપાલં દધદતિભયદો ભીષણાસ્યસ્ત્રિણેત્રઃ ।
રક્તાકારામ્બરોઽહિપ્રવરઘટિતગાત્રોઽરિનાગગ્રહાદીન્
    ખાદન્નિષ્ટાર્થદાયી ભવદનભિમતચ્છિત્તયે સ્યાદઘોરઃ ॥

## ૩૪. મૃત્યુઞ્જયઃ

સ્ફુટિતનલિનસંસ્થં મૌલિબદ્ધેન્દુરેખા-
 ગલદમૃતજલાર્દ્રં ચન્દ્રવહ્ન્યર્કનેત્રમ્ ।
સ્વકરકલિતમુદ્રાપાશવેદાક્ષમાલં
 સ્ફટિકરજતમુક્તાગૌરમીશં નમામિ ॥

## ૩૫. ચિન્તામણિશિવઃ (અર્ધનારીશ્વરઃ)

અહિશશધરગઙ્ગાબદ્ધતુઙ્ગમમૌલિઃ
 ત્રિદશગણનતાઙ્ઘ્રિસ્ત્રીક્ષણઃ સ્ત્રીવિલાસી ।
ભુજગપરશુશૂલાન્ ખડ્ગ વહ્ની કપાલં
 શરમપિ ધનુરીશો બિભ્રદવ્યાચ્ચિરં વઃ ॥

હાવભાવલસિતાર્ધનારિકં ભીષણાર્ધમથવા મહેશ્વરમ્ ।
પાશસોત્પલકપાલશૂલિનં ચિન્તયે જપવિધૌ વિભૂતયે ॥

## ૩૬. ચણ્ડેશ્વરઃ

અવ્યાત્કપર્દકલિતેન્દુકરઃ કરાત્ત-
 શૂલાક્ષસૂત્રકકમણ્ડલુટઙ્ક ઈશઃ ।
રક્તાભવર્ણવસનોઽરુણપઙ્કજસ્થો
 નેત્રત્રયોલ્લસિત વક્ત્રસરોરુહો વઃ (નઃ) ॥

## ૩૭. ગાયત્રી

મન્દારાહ્વયરોચનાઞ્જનજપાખ્યા(ખા)ભૈર્મુખૈરિન્દુમદ્-
 રત્નોદ્યન્મકુટાંશુભિસ્તત ચતુર્વિંશાર્ણચિત્રા તનુઃ ।
અમ્ભોજારિદરાહ્વયૌ ગુણકપાલાખ્યે ચ પાશાઙ્કુશે-
 ષ્ટાભીતીર્દધતી ભવેદ્ભવદભીષ્ટોત્તારિણી તારિણી ॥

## ૩૮. ત્ર્યમ્બકઃ

અચ્છસ્વચ્છારવિન્દસ્થિતિરુભયકરાઙ્કુસ્થિતં પૂર્ણકુમ્ભં
 દ્વાભ્યાં વેદાક્ષમાલે નિજકરકમલાભ્યાં ઘટૌ નિત્યપૂર્ણૌ ।
દ્વાભ્યાં તૌ ચ સ્રવન્તૌ શિરસિ શશિકલાબન્ધુરે પ્લાવયન્તૌ
 દેહં દેવો દધાનઃ પ્રદિશતુ વિશદાકલ્પજાલઃ શ્રિયં વઃ ॥

## ૩૯. સવિતૃજાતવેદોદુર્ગાત્ર્યમ્બકાઃ

સ્મર્તવ્યાખિલલોકવર્તિ સતતં યજ્જઙ્ગમસ્થાવરં
 વ્યાપ્તં યેન ચ યત્પ્રપઞ્ચવિહિતં મુક્તિશ્ચ યત્સિદ્ધિતઃ ।
યદ્વા સ્યાત્પ્રણવત્રિભેદગહનં શ્રુત્યા ચ યદ્ગીયતે
 તદ્વઃ કાઙ્ક્ષિતસિદ્ધયેઽસ્તુ પરમં તેજસ્ત્રયોત્થં મહઃ ॥

## ૪૦. સંવાદાગ્નિઃ

ધવલનલિનરાજચ્ચન્દ્રમધ્યે નિષણ્ણં
 કરવિલસિતપાશં સાઙ્કુશં સાભયં ચ ।
સવરદમમલેન્દુક્ષીરગૌરં ત્રિણેત્રં
 પ્રણમત સુરવક્ત્રં મઙ્ક્ષુ સંવાદયન્તમ્ ॥

## ૪૧. વરુણઃ

અચ્છાંશુકાભરણમાલ્યવિલેપનાઢ્યઃ
 પાશાઙ્કુશાભયવરોદ્યતદોસ્સરોજઃ ।
સ્વચ્છારવિન્દવસતિઃ સુસિતઃ પ્રસન્નો
 ભૂયાદ્વિભૂતિવિધયે વરુણશ્ચિરં વઃ ॥

## ૪૨. ભદ્રકાલી

સુરૌદ્રસિતદંષ્ટ્રિકા ત્રિણયનોર્ધ્વકેશોલ્બણા
 કપાલપરશૂલ્લસડ્ડમરુકા ત્રિશૂલાકુલા ।
ઘનાઘનનિભા રણદ્રુચિરકિઙ્કિણીમાલિકા

ભવદ્વિભવસિદ્ધ્યે ભવતુ ભદ્રકાલી ચિરાત્ ॥

## ૪૩. પ્રાણશક્તિઃ

રક્તામ્ભોધિસ્થપોતોલ્લસદરુણસરોજાધિરૂઢા કરાબ્જૈઃ
પાશં કોદણ્ડમિક્ષૂદ્ભવમથ ગુણમપ્યઙ્કુશં પઞ્ચ બાણાન્ ।
બિભ્રાણાસૃક્કપાલં ત્રિણયનલસિતા પીનવક્ષોરુહાઢ્યા
દેવી બાલાર્કવર્ણા ભવતુ સુખકરી પ્રાણશક્તિસ્વરૂપા ॥

## ૪૪. પાર્વતી

અસકલશશિરાજન્મૌલિરાબદ્ધપાશા-
ઙ્કુશરુચિરકરાબ્જા બન્ધુજીવારુણાઙ્ગી ।
અમરનિકરવન્દ્યા ત્રીક્ષણા શોણલેપાં-
શુકકુસુમયુતા સ્યાત્સમ્પદે પાર્વતી વઃ ॥

## ૪૫. અન્નપૂર્ણા

રુદ્રતાણ્ડવવિલોકનલોલાં ભદ્રવક્ત્રનયનાં ભવકાન્તામ્ ।
અન્નદાનનિરતાં જનનીં તાં ચિન્તયઞ્જપતુ ચિત્રદુકૂલામ્ ॥

## ૪૬. અશ્વારૂઢા

અશ્વારૂઢા કરાગ્રે નવકનકમયીં વેત્રયષ્ટિં દધાના
દક્ષેઽન્યેનાનયન્તી સ્ફુરિતતનુલતાપાશબદ્ધાં સ્વસાધ્યામ્ ।
દેવી નિત્યપ્રસન્નાનનશશધરબિમ્બા ત્રિનેત્રાભિરામા
દદ્યાદાદ્યાનવદ્યા પ્રવરસુખફલપ્રાપ્તિહૃદ્યાં શ્રિયં વઃ ॥

## ૪૭. વ્યાસઃ

મુનિવ્રાતાવીતં મુદિતધિયમમ્ભોદરુચિર-
દ્યુતિં વ્યાખ્યામુદ્રાકલનવિલસદ્દક્ષિણકરમ્ ।
પરં જાનૌ કૃત્વા દૃઢકલિતકક્ષ્યે કવિવરં

સમાસીનં વ્યાસં સ્મરત નિરતં પુણ્યચરિતમ્ ॥

## મઙ્ગલં

યદાશ્રયા વિપ્રકૃતિપ્રભાવતો
વિભિન્નતારાંશસમુત્થિતૌજસઃ ।
જગન્તિ પુષ્ણન્તિ રવીન્દુવહ્નયો
નમોઽસ્તુ તસ્મૈ પરિપૂર્ણતેજસે ॥

ઇતિ જગદ્ગુરુ શ્રીશઙ્કરભગવત્પાદવિરચિત પ્રપઞ્ચસારતઃ
સઙ્કલિતા ઈશ્વરધ્યાનમઞ્જરી સમાપ્તા ।

Proofread by Aruna Narayanan

*Ishvara Dhyana Manjari Compiled from Prapanchasara*
pdf was typeset on August 22, 2023

Please send corrections to *sanskrit@cheerful.com*